दिनाङ्क :-10.12.2024

प्रात: - 06:55

**प्रधानमन्त्री राजस्थान-हरियाणा**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः हरियाणायाः पानीपतक्षेत्रे बीमा-सखी-योजना आरब्धा। अस्याः योजनायाः लक्ष्यम् महिलानां मध्ये वित्तीय-साक्षरतायाः, बीमा इति-जागरूकतायाः च प्रोत्साहनं इति अस्ति। भारतीय-जीवन-बीमा-निगम-इत्येतस्य अयं उपक्रमः अष्टादशतः सप्ततिवर्षाणि यावत् ताः महिला: सशक्तिकरणं करिष्यति, याः , दशमीं कक्षां उत्तीर्णं कृतवत्य:। प्रधानमन्त्रिणा भावीभ्यः बीमा-सखीभ्यः नियुक्ति-प्रमाणपत्राणि अपि वितरितानि। जनसमूहं सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत्, सर्वेभ्यः आश्वस्तिः सामाजिकसुरक्षायाः प्रमुखः भागः अस्ति, निर्धनताया: निर्मूलनार्थं च महत्त्वपूर्णम् अस्ति। प्रधानमन्त्री अवदत् यत्, ग्रामेषु बैंक-सेवाः प्राप्तुं महिलाः महत्त्वपूर्णां भूमिकां निर्वहन्ति इति। इत: पूर्वं ह्यः प्रधानमन्त्रिण राजस्थानस्य जयपुरनगरे त्रिदिवसीयम् उदीयमान-राजस्थान-वैश्विक-निवेश-शिखरसम्मेलनम् उद्घाटितवान्। सः अवदत् यत्, भारतं लोकतन्त्रस्य, जनसाङ्ख्यिक्याः, दत्तांशस्य च वास्तविकशक्तिं विश्वं प्रति प्रदर्शयति।

**मिस्री- बाङ्ग्लादेश:**

विदेशसचिव: विक्रममिस्त्रीइत्येष: ह्य: ढाकानगरे भारत-बाङ्ग्लादेश-विदेश-कार्यालय-परामर्श-मण्डले स्वीयेन बाङ्ग्लादेशीयेन समकक्षेण मोहम्मद-जसीम-उद्दीन इत्यमुना साकं वार्तां विहितवान्। ढाकाया: एकदिवसीय-यात्रायाम् समागत: श्रीमिस्त्री इत्ययं बाङ्ग्लादेशस्य विदेशसचिवेन सह उपवेशनानि कृतवान्। ढाकायां वार्ताहरै: सह सम्भाषमाण: श्रीमिस्त्री इत्येष: उक्तवान् यत् भारतं बाङ्ग्लादेशेन सह साकारात्मकं रचनात्मकं लाभकारिणं सम्बन्धं च वाञ्छति इति।

## आर बी आई गवर्नर इति

सञ्जयमल्होत्रा इत्येष: भारतीय- रिजर्वबैंक इत्यस्य अग्रिम: गवर्नर इति भविष्यति। मन्त्रिमण्डलस्य नियुक्ति- समित्या तस्य नाम्ने स्वीकृति: प्रदत्ता। असौ त्रीणि वर्षाणि यावत् कार्यभारं निभालयिष्यति। नवत्यधिक-नवदशशत-तमवर्षस्य समूहस्य राजस्थान-प्रभागस्य भारतीय-प्राशासनिकसेवाया: अधिकारी श्रीमल्होत्रा इत्येष: वर्तमानसमये वित्त-मन्त्रालये राजस्वसचित्वेन कार्यरतो विद्यते। असौ शक्तिकान्तदासस्य स्थाने समागत:।

## राष्ट्रपति:-मानवाधिकारदिवस:

राष्ट्रपति: द्रौपदीमुर्मु: अद्य मानवाधिकार-दिवसावसरे नवदिल्ल्यां राष्ट्रियमानवाधिकारायोगेन आयोक्ष्यमाणं कार्यक्रमं सम्बोधयिष्यति। अयं दिवस: प्रतिवर्षं दिसम्बरमासस्य दशमे दिनाङ्के समायोज्यते। अस्य वर्षस्य शीर्षको विद्यते-अस्माकम् अधिकारा: अस्माकं भविष्यं साम्प्रतमेव इति। मानवाधिकारायोगेन एकस्मिन् प्रदत्तवक्तव्ये सूचितं यत् अस्य दिवसस्य उत्सवानन्तरं मानसिक-स्वास्थ्यं कक्षात: कार्यस्थलं यावत् मानसिकचिन्ताया: निदानम् इत्यस्मिन् विषये एकदिवसीयं राष्ट्रियसम्मेलनम् आयोजयिष्यते।

## आई एन एस तुशील:

रूसदेशस्य जलपोत-स्थानके नगरे कलिनिन-ग्राद इत्यत्र रक्षामन्त्रिण: राजनाथसिंहस्य उपस्थितौ भारतीय-नौसैन्यबले नवीनतमं मल्टीरोल स्टील्थ गाइडेड मिसाइल फ्रिगेट इति आइ एन एस् तुशील प्रक्षेपास्त्रं समाविष्टम्।

## दक्षिणकोरिया- यून् सुक् योल्

दक्षिणकोरिया-देशस्य अधिकारिणः गतमङ्गलवासरे अल्पकालिकस्य मार्शल्-लॉ इत्यस्य घोषणायाः विषयान्वेषणे वर्तमान-राष्ट्रपते: यून् सुक् योल् इत्यस्य उपरि

**यात्रा-प्रतिबन्धम् आरोपितवन्तः। भ्रष्टाचार-अन्वेषणकार्यालयस्य उच्चपदस्थ-अधिकारिणां घोषणायाः किञ्चित्कालानन्तरम् एव न्यायमन्त्रालयेन निषेधः आरोपितः अस्ति यत् सः आदेशाय निवेदनं प्रेषितवान् इति। स्थानीयवार्तामाध्यमानुसारि यून् इत्यस्य आकस्मिक-मार्शल्-लॉ इत्यस्य घोषणायाः विषये युगपत्-अन्वेषणेषु शङ्कितः इति नामाङ्कितः अस्ति।**